# Kashyapakritam Gayatrisarasvati Stotram

# काश्यपकृतं गायत्रीसरस्वतीस्तोत्रम्

## Document Information

Text title : Kashyapakritam Gayatrisarasvati Stotram

File name : kAshyapakRRitaMgAyatrIsarasvatIstotram.itx

Category : devii, devI, skandapurANa, gAyatrI, sarasvatI, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : skandapurANa | brAhmakhaNDa | setukhaNDa | adhyAya 41/99-105||

Latest update : May 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 15, 2025

*sanskritdocuments.org*

# काश्यपकृतं गायत्रीसरस्वतीस्तोत्रम्

काश्यप उवाच ।
चतुराननगेहिन्यौ जगद्धात्र्यौ नमाम्यहम् ।
विद्यास्वरूपे गायत्री-सरस्वत्यौ शुभे उभे ॥ ९९॥

सृष्टिस्थित्यन्तकारिण्यौ जगतो वेदमातरौ ।
हव्यकव्यस्वरूपे च चन्द्रादित्यविलोचने ॥ १.४१.१००॥

सर्वदेवाधिपे वाणी-गायत्र्यौ सततं भजे ।
गिरिजा कमला चापि युवामेव जगद्धिते ॥ १॥

युष्मद्दर्शनमात्रेण जगत्सृष्ट्यादिकल्पनम् ।
युष्मन्निमेषात्सततं जगतां प्रलयो भवेत् ॥ २॥

उन्मेषात्सृष्टिरभवद्वोगायत्रि-सरस्वति ।
युवयोर्दर्शनादद्य कृतार्थोऽभवमाशु वै ॥ ३॥

मामद्य पातकान्मुक्तं स्नानात्तीर्थ द्वयेऽत्र तु ।
स्वीकुर्वन्तु मुनिश्रेष्ठा ब्राह्मणा बान्धवास्तथा ॥ ४॥

इतः परं पापकृत्ये मा मे बुद्धिः प्रवर्तताम् ।
धर्मे प्रवर्ततां नित्यमयमेव वरो मम ॥ ५॥

दीयतां भो महादेव्यौ नान्यमिच्छाम्यहं वरम् ॥

इति श्रीस्कन्दपुराणे ब्रह्मखण्डे सेतुखण्डे एकचत्वारिंशा- ध्यायान्तर्गतं
काश्यपकृतं गायत्री-सर्वती-स्तोत्रं समाप्तम् ।

स्कन्दपुराण । ब्राह्मखण्ड । सेतुखण्ड । अध्याय ४१/९९-१०५॥

skandapurANa . brAhmakhaNDa . setukhaNDa . adhyAya 41/99-105..

Proofread by PSA Easwaran

*Kashyapakritam Gayatrisarasvati Stotram*

pdf was typeset on May 15, 2025

Please send corrections to *sanskrit@cheerful.com*